नामांक Roll No.

| | | | | | | |
|---|---|---|---|---|---|---|
| | | | | | | |

No. of Questions – **30**

No. of Printed Pages – **04**

# VU-86-Vyak. Shas. (Supp.)

## व्याकरणशास्त्रम् (ऐच्छिकम्)

## वरिष्ठ उपाध्याय पूरक परीक्षा, 2020

**समय : 3¼ घण्टे**

**पूर्णांक : 80**

**परीक्षार्थिभ्यः सामान्यनिर्देशाः**

(1) परीक्षार्थिभिः सर्वप्रथमं स्वप्रश्नपत्रे निर्धारितस्थाने नामांकः अनिवार्यतो लेखनीयः ।

(2) सर्वे प्रश्नाः अनिवार्याः ।

(3) सर्वेषां प्रश्नानामुत्तराणि उत्तरपुस्तिकायामेव लेखनीयानि ।

(4) एकस्य प्रश्नस्य सर्वेषां खण्डानामुत्तराणि एकत्र एव लेखनीयानि ।

(5) सर्वेषां प्रश्नानाम् उत्तराणि संस्कृतमाध्यमेन एव लेखनीयानि ।

1. सम्प्रसारणादचि पूर्वरूपमेकादेशः केन सूत्रेण भवति ? **1**

2. 'सुद्युभ्याम्' इत्यत्र दिवोऽन्तादेश उकारः केन सूत्रेण भवति ? **1**

3. 'इयम्' इत्यत्र इदमो दस्य यः केन सूत्रेण भवति ? **1**

4. 'आपः' इत्यत्र दीर्घः केन सूत्रेण भवति ? **1**

5. 'कृन्मेजन्तः' इति सूत्रस्यार्थो लेख्यः । **1**

6. अपादानं किम् ? **1**

7. 'वि प्राय गां ददाति' इत्यत्र सम्प्रदानसंज्ञा विधायकं सूत्रं लिखत । **1**

8. 'बलिं याचते वसुधाम्' इत्यत्र कर्मसंज्ञा केन सूत्रेण भवति ? **1**

9. 'य्वन्तमेकाक्षरम्' इति सूत्रस्योदाहरणं लिखत । **1**

10. 'याच्ञा स्त्रियाम्' इति सूत्रस्यार्थो लेख्यः । **1**

11. 'दादेर्धातोर्घः' इति सूत्रस्य सोदाहरणमर्थो लेख्यः । **2**

12. राज्ञः इत्यत्र 'ज्ञः' कयोः वर्णयोः मेलनं जायते । **2**

13. 'अपो भिः' इति सूत्रस्य सोदाहरणमर्थो लेख्यः । **2**

14. 'इदम्' शब्दस्य स्त्रीलिङ्गे सर्वाणि रूपाणि लिखत । **2**

15. 'शप्श्यनोर्नित्यम्' इति सूत्रस्य सोदाहरणमर्थो लेख्यः । **2**

16. 'तुदन्ती' इत्यत्र नुमागमः केन सूत्रेण भवति ? **2**

17. 'अपदादिविधौ किम् ? दधिसेचौ' इति विवेचयत । **2**

18. अङ्गविकारे का विभक्तिर्भवति ? **2**

19. कौचिद् द्वौ प्रयोगौ साधनीयौ – **2 + 2 = 4**

लिटत्सु, चतुर्षु, वृत्रघ्नः ।

20. 'अष्टाभ्य औश्' इति सूत्रं सोदाहरणं व्याख्यायताम् । **4**

21. कौचिद् द्वौ प्रयोगौ साधनीयौ – **2 + 2 = 4**

इयम्, उपानत्, चतसृणाम् ।

22. कौचिद् द्वौ प्रयोगौ साधनीयौ – **2 + 2 = 4**

चत्वारि, अहोभिः, दीव्यन्ती ।

23. कौचिद् द्वौ प्रयोगौ साधनीयौ – **2 + 2 = 4**

स्मारं-स्मारम्, उदेतोः, कृत्वा ।

24. कयोश्चिद् द्वयोः सूत्रयोः सोदाहरणमर्थो लेख्यः – **2 + 2 = 4**

वयसि प्रथमे, स्वाङ्गाच्चोपसर्जनादसंयोगोपधात्, आयनेयीनीयियः फढखछघां प्रत्ययादीनाम् ।

25. कौचिद् द्वौ प्रयोगौ साधनीयौ – **2 + 2 = 4**

श्रीः, ग्रामादायति, गर्गान् शतं दण्डयति ।

26. केषाञ्चित् चतुर्णां शब्दानां ससूत्रं लिङ्गनिर्धारणं कुरुत – **1 + 1 + 1 + 1 = 4**

दुहितृ, ग्लानिः, नवतिः, पाकः, जयः, हसनम् ।

27. कयोश्चिद् द्वयोः सूत्रयोः सोदाहरणमर्थो लेख्यः – **2 + 2 = 4**

अशनिभरण्यरणयः पुंसि च, शलाकास्त्रियां नित्यम्, बाणकाण्डौ नपुंसके च ।

28. केचित् त्रयः प्रयोगाः साधनीयाः – **2 + 2 + 2 = 6**

सुद्यौः, आभ्याम्, पन्थाः, वयम्, अमी ।

29. केचित् त्रयः प्रयोगाः साधनीयाः – **2 + 2 + 2 = 6**

बाला, कर्त्री, सीमा, करभोरूः, युवतिः ।

30. केचित् त्रयः प्रयोगाः साधनीयाः – **2 + 2 + 2 = 6**

हरिं भजति, अभिनिविशते सन्मार्गम्, सतः पालकोऽवतरति, अन्नस्य हेतोर्वसति, अध्ययनात् पराजयते ।

---

DO NOT WRITE ANYTHING HERE